॥ ७ ॥ आह्निकप्रारंभः ॥ ७ ॥ ७ ॥

॥१॥ श्रीगणेशायनमः ॐ॥तत्रप्रभातेउत्थायमातापितृगुरुंइष्टदेवान्मनसा
स्मरन्॥तदहःकर्तव्यंविचार्य॥ब्रह्मामुरारिस्त्रिपुरांतकारीभानुःश
शीभूमिसुतोबुधश्च॥गुरुश्चशुक्रःशनिराहुकेतवःकुर्वंतुसर्वेममसुप्र
भातं॥१॥श्रगुर्वसिष्ठःकतुरंगिराश्चमनुःपुलस्त्यःपुलहश्चगौत
मः॥रेभ्योमरीचिश्च्यवनश्चदक्षःकुर्वं०॥२॥सनत्कुमारश्चसनंदन
श्चसनातनोप्यासुरिपिंगलौच॥सप्तस्वराःसप्तरसातलानिकुर्वं०
॥३॥सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवनानिसप्त॥भूरा
दिकृत्वाभुवनानिसप्तकु०॥४॥पृथ्वीसगंधासरसस्तथापःस्पर्शीच ॥१॥

वायुर्ज्वलितंचतेजः॥नभःसशब्दंमहतीसहैनकुर्वं०॥५॥इत्थंप्रभातेप
रमंपवित्रंपठेत्स्मरेद्वाश्रृणुयाच्चतद्वत्॥दुःस्वप्ननाशस्त्विहसप्रभा
तंभवेच्चनित्यंभगवत्प्रसादात्॥६॥पुण्यश्लोकोनलोराजापुण्यश्लो
कोयुधिष्ठिरः॥पुण्यश्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः॥७॥क
र्कोटकस्यनागस्यदमयंत्यानलस्यच॥ऋतुपर्णस्यराजर्षेःकीर्तनं
कलिनाशनं॥८॥अश्वत्थामाबलिर्व्यासोहनुमांश्चविभीषणः॥
कृपःपरशुरामश्चसप्तैतेचिरजीविनः॥९॥सप्तैतान्संस्मरेन्नि
त्यंमार्कंडेयमथाष्टमं॥जीवेद्वर्षशतंसोपिसर्वव्याधिविवर्जितः॥१०॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥२॥ अहल्याद्रौपदीसीतातारामंदोदरीतथा॥पंचकंनास्मरेन्नित्यंम हा
पातकनाशनमितिमंत्रंन्यूनपक्षिलाबहिर्गत्वादेवालयवल्मीकम्रुष
कस्थलमार्गस्नानवापीकूपतडागवृक्षमूलस्थशौचावशिष्टकी
टास्थिमिश्रव्यतिरिक्तान्मृत्तिकांजलंपात्रंचक्षुरोदेशंगत्वाग्नि र
व्यातीर्थश्मशानगोमय यज्ञभूमिफालकृष्टजलचित्तिवल्मी
कगिरिमस्तकदेवालयनदीतीरदर्भपुण्यस्थलसेव्यछायामा
र्गगोष्ठव्यतिरिक्तैकांतस्थलेशुद्ध भू मौ यज्ञमयैस्तृणैराछा अ
धवस्त्रप्रावृतश्चेस्पष्टतःकंठ लंबियज्ञोपवीतंएकवस्त्रश्चे ॥२॥

दक्षिणकर्णेनिहितयज्ञोपवीतमूत्रमौवाप्यर्कदेवाग्निगोतुलसीविप्रान
भिमुखोदिवासंध्ययोरुदङ्मुखोमूत्रपुरीषउत्सृज्यलोष्टादिना गुह्यं
परिमृज्यगृहीतशिश्नउत्थायपूर्वंनिहितमृज्जलपात्रंगृहीत्वाऽऽर्द्रमृल
कमात्रमृदाजलेनचैकवारंलिंगशौचंकुर्यात्॥मैथुने त्वेतत्त्रिगुणंमै
थुनरहितरेतोविसर्गेतुद्विगुणं॥ततोवामहस्तमृदाजलैश्चत्रिः शोध्या
थं प्रसृतितदर्धार्धमात्रमृद्भिर्जलैःपंचवारमपानंसंशोध्य पुनर्जलै
रेवलिंगंगुदंप्रक्षाल्य स्फिक्शौचंचरुत्वावामकरमाद्रीम
लकमात्रमृद्भिर्जलैश्चदशवारंप्रक्षाल्यहस्तद्वयंतावन्मात्रामि

॥३॥ रेवमङ्गुर्जलैः सप्तवारंप्रक्षालयेत्॥मूलमात्रोत्सर्गेलिंगंपूर्ववदेकवा
रंत्रिवारंवाप्रक्षाल्यवामकरंतथैवत्रिःप्रक्षाल्यकरद्वयंतथैवत्रिःप्रक्षा
लयेत्॥एतच्छौचंगृहस्थानांएतदर्धंस्त्रीव्रतीवनीयतीनांद्विस्त्रिचतुर्गुणं॥
अतुपनीतारक्तानांगेपत्तेपक्षयमात्रकरं॥सर्वेषारोग्यातुरस्य ध्वसुच त्रो
क्तातिस्विकविहितशौचार्धंतदर्धानि॥एवंशौचंकृत्वाद्वादशांगुलमृत्पात्रं
शुचिदेशेभूमिष्ठपादोतर्जानुहस्तहृदयःप्राङ्मुखउदङ्मुखउपविश्यद
क्षिणकरेणशुद्धजलमादायकनिष्ठिक्यांगुष्ठौविहायेतरांगुलीसंहतोधो
कृत्वाब्रह्मतीर्थेनऋग्वेदायनमः॥यजुर्वेदायनमः॥सामवेदायनमइति ३

स्वाहा॥ॐ-ह्रां हैं अं अँ नी सुतायअंगुष्ठाभ्यांनमः॥ओंनमोरु
द्रायसहस्रमूर्तयेतर्जनीभ्यां०॥ॐवायुसुतायमध्यमाभ्यांन
मः॥ओंवमेजकवचीभ्यांअनामिकाभ्यां०॥ॐरामदू
तायकनिष्ठिकाभ्यां०॥ॐब्रह्मास्त्रनिवारणायकरतलकर
पृष्ठाभ्यां०॥ॐसर्वभूतनिवारणायेतिदिग्बंधः॥ध्यायेद्वा धृ
लदिवाकरद्युतिनिभंदेवारिदर्पापहं॥देवेंद्रप्रमुखंप्रशस्तयश
सं[illegible]पीयमानंरुचा॥सुग्रीवादिसमस्तवानरयुतंसुव्यक्त
तत्त्वप्रियंसरक्तारुणलोचनंपवनजंपीतांबरालंकृतं॥उद्य
न्मार्तंडकोटिप्रकटरुचियुतंचारुसिंहासनस्थंमोजीप

ज्ञोपवीतामरणमुकश्रिवत्सांकितंकुंडलाढ्यं॥मकानौमीष्ट
३ दानंप्रणयमर्णितंवेदनादप्रमोदंध्यायेद्देवंविधेयंप्लवगकुल
पतिंगोष्पदीभूतवार्द्धि॥वज्रांगंपिंगकेशाढ्यंस्वर्णकुंडलमं
डितं॥नियुद्धमपिसंक्रम्यपारावारपराक्रमं॥१८॥वामहस्तमु
पाकृष्टशास्यकरखंडनं॥उद्यद्दक्षिणदोर्दंडंहनूमंतंविचि
न्तयेत्॥१९॥कर्णद्वंदेकमकरचिरंकुंडलंधारयंतंसत्कौपीनं
कैर्वपकुलंरवंकामरूपंकपींद्रं॥वंदेनविद्युज्वलमिवलसत्
ब्रह्मसत्रैकनिष्ठंपुत्रंवायोःकमलवसनंवज्रदेहंवरेण्यं॥२०
कटिचपरे

त्रिःपीत्वापाणिंप्रक्षाल्याकुंचितोष्ठमास्यंस्पृष्ट्वानोगुष्ठमूलेनाथर्ववेदा
हा यनमःसेतिसपुराणेभ्योनमइतिहिःपरिमृज्यसंहतोगुष्ठतर्जन्यी
भ्यामपस्पृष्ट्वासूर्यायनमः॥सोमविनमइतिदक्षिणवामनेत्रेस्पृष्ट्वा पस्पृ
मः ष्ट्वागुष्ठमध्यमाभ्यामारुतेनेवायवेनमइतिदक्षिणवामनासाहूयंस्पृष्ट्वापः बिल
स्पृष्ट्वाताभ्यामेवदक्षिणवामकर्णहूयंदिग्भ्योनमइतिथेव स्पृष्ट्वा
पस्पृष्ट्वागुष्ठानामिककनिष्ठिकाभिर्दक्षिणवामंहूयंइंद्रायनमइतिथेव बाहु
याम स्पृष्ट्वापस्पृष्ट्वासर्वांगुलीभिर्दक्षिणंपादहूयंपृथिव्यैनमइतिथेवस्पृष्ट्वा
पस्पृष्ट्वातामिरेवांतरिक्षायनमइतिथेवजानुहूयंस्पृष्ट्वापस्पृष्ट्वाता

आ० निरेवदिवेनमइतिगुह्यंस्पृष्ट्वापस्पृष्ट्वातानिरेवब्रह्मणेनमइतिनाभिंस्पृणि
ता० ताकेनविष्णवेनमइतिहृदयंसर्वाभिरंगुलिभिःशिवायनमइतिशिरःप्रत्येक
मंभः पूर्वंस्पृष्ट्वाप्रदक्षिणंजलेनात्मानंपरिषिच्यपुनरेवमाचमनंकु
र्यात्॥अथवाकेशव नारायणमाधवेतित्रिभिर्नीभिरपस्पृश्यगोविंदविष्णो पी
इतिद्वाभ्यांकरौप्रक्षाल्यमधुसूदनत्रिविक्रमेतिद्वाभ्यामोष्ठौसंमृज्य वामन स
श्रीधरेतिद्वाभ्यांमुखमवाङ्निमृज्यहृषीकेशेत्येकेनवामकरंदक्षिणेनाप्यनाएकस्प
मेत्येकेनपादौसंप्रोक्ष्यदामोदरेत्येकेनमूर्धानंसंकर्षणेत्येकेनोर्ध्वंमुखः ४
अंगुल्यग्रैर्वासकृदेवेतिदक्षिणनासारंध्रंअंगुष्ठतर्जनीभ्यांप्रद्युम्ने

वामनासारंध्रंतास्यामेवानिरुद्धेतिदक्षिणाक्ष्यंगुष्ठा नामिकाभ्यांपुरुषोत्त
मेतिवामाक्षितास्यामेवाधोक्षजेतिदक्षिणश्रोत्रमंगुष्ठकनिष्ठिकाभ्यांनार
सिंहेतिवामश्रोत्रंतास्यामेवाच्युतेतिनाभितास्यामेवजनार्दनेतिहृदयंपा
णितलेनउपेंद्रेतिशिरःपाणिनाहरइतिदक्षिणभुजंसर्वांगुल्यग्रैःस्पृष्ट्वेतिवा
मभुजंएतेरेवस्पृष्ट्वेदंविष्णुरितिवंक्षिराचमनंकुर्यात्॥एवंक्षिराचम्यप्रतिपत्संचदशी
षष्ठीचतुर्दश्यष्टमीनवमीद्वादशीत्रिजन्मनक्षत्रंजन्मदिवसव्यतीपातसंक्रां
तियज्ञोपवासश्राद्धदिनव्यतिरिक्तदिनेषुब्राह्मणोद्वादशांगुलप्रमाक्ष पं
त्रियवैश्यशूद्रास्तुनवषट्चतुरंगुलप्रमाणंकनिष्ठिकांवत्स्रुवोदुंबरप्र ग्र

अंक- क्षापामार्गवेणुजंबुचूताशोकखदिरक्षकंटकवृक्षान्यतमवृक्षोद्भवंचूर्णीकृत्वाग्रं ६
१५ काष्ठंआयुर्बलंयशोवर्चःप्रजाःपशवःसर्वान्नाद्यमन्नपानंमेधांत्वंनोधेहि
।दये वनस्पतेइत्यभिमंत्र्यतेनसर्वंतान्संशोध्यतत्प्रक्षालितंमृत्कांस्यौदेशोन्यस्य
तावद्देशेवह्निंहोत्रेत्यनिकयाजिह्वांसंशोध्यद्वादशगंडूषीकृत्वापूर्ववद्विराचमे
त्।।ततःस्रुवंगोमयंगृहीत्वानद्यादिसमीपेगत्वोदुत्तरंजलेःपाणीमुखंपादौच
प्रक्षाल्यभूमौप्रतिष्ठापितपादआचम्यसप्रणवांगायत्रीस्मृत्वाषड्भिरंगैश्च
चातोदर्भपाणिर्दंडवत्सकलान्निमज्यतीरमागत्योपविश्याचम्यप्राणानाय ५
म्यदेशकालौसंकीर्त्यममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रा

त्यःस्नानंकरिष्यइतिसंकल्पंबीक्षितंगोमयंबामहस्तेसंस्थे।।ॐभूःॐभुवः प्राग्दि
ॐस्वरितिक्षेपाविभज्यदक्षिणभागेप्राच्यादिदिग्दिक्षुप्रणवेनक्षिप्त्वोत्तरभा
गेतीर्थंनिक्षिप्यमध्यभागेनमानस्तोकइत्यभिमंत्रितेनगंधद्वारामित्यनेनअप्र ध
मयचरंतीनामोषधीनांवनेवने।।तासामृषभपत्नीनांपवित्रंकायशोधनं।।
तन्मेरोगांश्चशोकांश्चपापानिनुदगायेतिमंत्रेणवामनुत्थ्यंहिरण्यशृंगंव
रुणंप्रपद्येतीर्थंमेदेहियाचितः।।यन्मयाभुक्तसाधूनांपापेभ्यश्चप्रतिग्र
हः।।यन्मेमनसावाचोकर्मणावाऽपकृतंकृतं।।तन्नइंद्रोवरुणोबृहस्पतिः
सविताचपुनंतुपुनःपुनः।।इतिवरुणंसंप्रार्थ्यकेशान्पुरतःकृत्वाप्रवा

आ॰ह जलेप्रवाहाभिमुखोन्यत्रार्कोभिमुखोरात्रावप्यग्निमुखःसंध्ययोःसं
६ ध्याभिमुखःगेहे गेहाभिमुखःत्रिवारंनिमज्यकक्षादीनिनिमज्यसकृ
त्स्नात्वाद्विराचम्यांबयोयंत्यध्वभिरित्यृषाभिरापोहिष्ठेतिनवभिश्वकुशै
र्मार्जनंकृत्वापोहिष्ठेतितिसृभिर्जलमभिमंत्र्यागुष्ठेनमंमेगंगइतित्रिःप्रदक्षि
णंजलमात्मोपरिगुष्ठांगुलिभिःश्रोत्रदृशोःसामुखंसंपीड्यस्नानंदिगभि
मुखंसंकल्पंकरिष्यमाणस्तंचैतित्रचेनदुपदर्शयेत याचाघमर्षणंकृत्वा त्रि
र्द्विराप्लुत्यद्विराचम्योभस्मधारणंकरिष्यन्नुद्धूलनमंत्रंजपेत्ततःप्राङ्मुखःसाक्षतामिरद्भिर्ब्रह्मा ६
दयोयेदेवास्तान्देवांस्तर्पयामि।भूर्देवांस्तर्पयामि।भुवर्देवांस्तर्पय॥

स्वर्देवांस्तर्प॰भूर्भुवस्वर्देवां॰एकैकमंजलिंदेवतीर्थेनदत्वानिवीत्युदङ्मुखःसयव
मिरद्भिःकुशद्वयपायनादयोयेऋषयःस्तान्ऋषीस्तर्पयामि।भूर्ऋषीस्त॰भुवर्ऋषी॰
स्वर्ऋषींस्तर्प॰भूर्भुवस्वर्ऋषीस्त॰इतिद्वौद्वावंजलीऋषितीर्थेनदत्वाप्राचीना
वीतिदक्षिणाभिमुखःसतिलाभिरद्भिःसोमःपितृमान्यमोंगिरस्वानग्निष्वात्ताग्नि
कव्यवाहनादयोयेपितरस्तान्पितॄंस्तर्पयाम॰भूःपितॄंस्तर्प॰भुवःपितॄंस्त॰स्वः
पितॄंस्तर्प॰भूर्भुवःपितॄंस्तर्प॰इतित्रीस्त्रींजलीन्पितृतीर्थेनदत्वातीरमा
गत्यअग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेममा।भूमोदन्तेनतृप्यंतुत
त्सर्पांतुपरांगतिमिति॥जलांजलिंतटेनिक्षिप्यैकेचास्मत्कुलेजाता

आ॰क॰ अपुत्रागोत्रजा मृता॥तेषु हेतुमयादसंवस्त्रनीव्योदकमितिपरिधानी
७ यैनिव्वीतोपवीतियन्मयादुष्टं तेनोयंशारीरमलसंभवात्॥तद्दोषपरिहारार्थं
यक्ष्माणंतर्पयाम्यहमितियक्ष्मतर्पणंकृत्वाहुंतीर्यदेहेस्वयमेवशुष्केजातेकेशा जत्ना
जलेचस्तेआर्द्रवासस्त्यक्त्वाशुचिशुष्कंपरिधानीयवस्त्रंपरिधायतद्वगेवोत
रीयंकृत्वाशुष्कभावेआर्द्रमेवसप्त वारमवधूयप्रक्षाल्यार्द्रवस्त्रेचतुर्गुणमुप
रिदत्तंस्थलेनिव्वीत्यपादौसजंघौप्रक्षाल्यहिराचंम्यगंगादिस्मृत्ति कया
तर्जनीमध्यमनामिकान्यतमांगुल्याशिरोभालनासिकाकंठकूपोदरदक्षिण ७
वामपार्श्वेदक्षिणवामबाहुस्कंधदक्षिणवामकर्णीध्यःपृष्ठःस्तनेषुप

पवित्रंतेविततं॰

णवेनयथाक्रमंशिरसि पुनोदीयकमंडलुमुदकदीयवेणुपत्रजंबूपत्रदं
डदीपाकारोस्तिलकान्कृत्वाकुशासनेउपविंहिराचम्यपवित्रवंतइति द्व्य
मंत्राभ्यांपवित्रेकृत्वामध्यमातर्जनीव्यतिरिक्तांगुलित्रयेणनासिकांग्र
हीत्वावामनासारंध्रेणवायुमाकृष्यनासिकोंढंनिष्पीड्यवायुनिरोधंप्रद
कुर्व्वन् प्रथममार्गेत्रिकंपंचदशमात्रकंप्राणायामंकृत्वादक्षिणनासा
रंध्रेणरानैर्वायुं विसृज्यपुनरेवंहिःकृत्वाआयतप्राणः॥प्रणवस्य
परब्रह्म ऋषिः अग्निर्देवता गायत्रीछंदः सप्तानांव्याहृतीनांविश्वा
मित्रभृगुभरद्वाजवसिष्ठगौतमकश्यपांगिरसाऋषयः॥प्रजापतय्ये

आ॰क॰ वाप्यादित्यबृहस्पतीड्विश्वेदेवादेवता॥ गायत्र्युष्णिगनुष्टुप्बृहतीपं
क्तित्रिष्टुप्जगत्यश्छंदांसि॥ गायत्र्याविश्वामित्रऋषिःसवितादेवतागा
यत्रीछंदः गायत्रीशिरसः प्रजापतिऋषिः ब्रह्माग्निवाय्वादित्यदेवतायु
ज्छंदः प्राणायामेविनियोगइत्युच्चार्यसप्रणव सस्तस्माद्गतिकांस्त्रीर
क्कांगायत्रीत्रिःपठित्वापुनःपूर्ववद्व्याहृतिभिर्मूर्ध्नोपातदुरितक्षय द्वारा श्री
परमेश्वरप्रीत्यर्थंप्रातःसंध्यामुपासिष्येइतिसंकल्प्यापोहिष्ठेतितृचस्यां
बरीषसिंधुद्वीपऋषिः॥आपोदेवता॥गायत्रीछंदः॥मार्जनेविनियोगइ
त्युच्चार्य॥ॐआपोहिष्ठेत्यादिप्रतिपादं प्रणवपूर्वंशिरसिमार्जनं

कृत्वासूर्यश्चेतिमंत्रस्ययाज्ञवल्क्युपनिषदृषिः।सूर्यमामन्युम
न्युपतदेयोवतासूर्यश्चेत्यादिपापेभ्यरक्षंतामित्यंतंचतुर्विंशत्यक्षरागाय त्र्यो
त्रीयद्राज्येत्यारभ्यमयीत्यंतंपंचपदापंक्तिः।इदमहमित्यारभ्यस्वाहे
त्यंतंदशाक्षरमुपेतंविराछंदः।मंत्राचमनेविनियोगइत्युच्चार्यसूर्यश्च
मामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः।पापेभ्यरक्षंतां।यद्राज्यापाप त्र्यो
मकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नाराज्तिस्तदव
लुंपतुयत्किंचदुरितंमयिइदमहंमामममयोनौसूर्यज्योतिषि

जुहोमि स्वाहेति मंत्रेणापः पीत्वाद्विरा चम्यापोहिष्ठेति नवर्चस्यांबरीष ऋषि
र्धुद्वीप ऋषिः। आपोदेवता सप्तानाम्चमो गायत्री छंदः पंचमी वृधमा
नासप्तमी त्रिष्टुप छंसेहे अनुष्टुभौ मार्जने विनियोगइत्युच्चार्य प्रणवचमो
कारपूर्वं आपोहिष्ठेतिनवर्चेनशिरसिमार्जनंकृत्वा ऋतंचेतिसप्तचस्यापा
मर्षण ऋषिः। भाववृत्तोदेवता अनुष्टुप छंदः। अघमर्षणे विनियोग
इत्युच्चार्य ऋतंचेतिसप्तचेनकरस्थजलं नासिकांतंनीत्वादक्षिणपाणि
गृहीतंवामभागेनक्षिप्त्वासहस्रशीर्षसूक्तऋषिर्देवताछंदोविनियोगांत
र्प्रणवव्याहृतिगायत्रीमुच्चार्य सृष्टीयवत्सरंध्येदत्वादक्षिणपाणि उदहो

MEMORIAL

तजलेनासावादित्योब्रह्मेतिमंत्रेणात्मानंपरिषिंचन्प्रदक्षिणंपरिक्रम्यद्विरा
चम्यशुचिदेशेस्वासनेउपविश्यापसर्पंतुयेभूतायेभूताभूमिसंस्थिताः। येभूतावि
घ्नकर्तारस्तेनश्यंतुशिवाज्ञयाअपक्रामंतुभूतानिपिशाचाःसर्वतोदिशंसर्वेषा
मविरोधेनब्रह्मकर्मसमारभे इतिभूतशुद्धिंकृत्वाऽर्घ्यत्रयाधृतालोदकेत्रिवि
कृतानायतास्त्रंचधारयमांदेविपवित्रंकुरुचासनमितिपठित्वाप्रणवस्येत्या
दिप्राणायामंविनियोगइत्यंतंपूर्ववदुच्चार्य ओंअंनमः नाभौ ओंउंनमः हृ
दये। मंनमः कंठे। ओंओंनमः ब्रह्मरंध्रेइतिप्रणवेनांगंन्यासंकृत्वा। तेनैवओंअंअं
गुष्ठाभ्यांनमः। ओंउंतर्जनीभ्यांनमः। ओंमंमध्यमाभ्यांनमः। ओंअंअनामिका

आ॰क॰ भ्यो॰ॐ उंकनिष्ठिकाभ्यो॰ॐ मंकरतलकरपृष्ठाभ्यो॰॥इत्यंगुलीन्यासंकृत्वा॥
१० तेनैव॥ॐअंहृदयायनमः॥ॐउंशिरसेस्वाहा॥ॐ मंशिखायैवषट्॥ॐअं
कवचायहुं॥ॐउंनेत्रत्रयायवौषट्॥ॐमंअस्त्रायफट्॥इतिषडंगंन्यासंविधायव्या
हृतिगायत्रीत्रिरोभिः॥ॐभूःपद्भ्यांनमः॥ॐभुवजानुभ्यो॰स्वःकट्यैनमः॥ॐम
हःनाभ्यै॰ॐजनःकंठाय॰तपःवक्षायनमः॥सत्यंब्रह्मरंध्रायनमः॥ॐतत्स॰
वितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्॥कवचायनमः॥ॐआपः शिरसेनमः॥ॐज्योतिःनेत्र त्रयायनमः॥
ग्रा ॐरसःजिह्वायनमः॥ॐअमृतंललाटायनमः॥ॐ ब्रह्महृदयायनमः॥ॐ १०
भूर्भुवःस्वरोंमूर्धिखायैनमः॥इत्यंगंन्यासंकृत्वा॥तेनैव॥ॐभूःअंगु

---

३ नरेण्यंतर्जनीभ्यां॰भर्गोदेवस्यमध्यमाभ्यां॰धीमहिअनामिकाभ्यां॰ ३

ष्ठाभ्यां॰ॐभुवःतर्जनीभ्यां॰ॐस्वःमध्यमाभ्यां॰ॐमहःअनाकाभ्यां॰
ॐजनःकनिष्ठिकाभ्यां॰ॐतपःकरतलकरपृष्ठाभ्यां॰तत्सवितुरंगु सत्यं २
ष्ठाभ्यांधियोयोनःकनिष्ठिकाभ्यां॰प्रचोदयात्करतलकरपृष्ठाभ्यां॰
ॐआपःअंगुष्ठाभ्यां॰ॐज्योतिःतर्जनीभ्यां॰ॐरसःमध्यमाभ्यां॰ २
ॐअमृतंअनामिकाभ्यां॰ॐब्रह्मकनिष्ठिकाभ्यां॰ॐभूर्भुवःस्वरों
करतलकरपृष्ठाभ्यां॰इत्यंगुलीन्योर्विधायपूर्ववत्त्रिःप्राणानायम्यगाय सं
त्र्याविश्वमित्रऋषिः।सवितादेवताश्वेतवर्णाअग्निमुखब्रह्मशिरःवि
ष्णुहृदयंरुद्रोऽस्यशिखाऽदितिःपृथिवीकक्षिःत्रैलोक्यंचरणाःसांख्यायनगोत्रंअ

पदागायत्रीअशेषपापक्षयार्थंगायत्रीजपमहंकरिष्येइत्युत्वार्थं॥ॐतेन
११ मःदक्षिणपादे॥ॐसंनमःवामपादे॥ॐविंनमःदक्षिणजानौगुंनमःवा
मजानौ॥ॐवंनमःदक्षिणोरौ॥ॐरेंनमःनाभौ॥ॐणिंनमःमुखे॥ॐ
यंनमःनाभौ॥ॐभंनमःशिरसि॥ॐगोंनमःललाटे॥ॐदेंनमःदक्षिणनेत्रे॥
ॐवंनमःवामनेत्रे॥ॐस्यंनमःदक्षिणकर्णे॥ॐधींनमःवामकर्णे॥
ॐमंनमःदक्षिणनासापुटे॥हिंनमःवामनासापुटे॥धिंनमःवक्त्रे
॥ॐयोंनमःचुबुके॥ॐयोंनमःकंठेनंनमःदक्षिणबाहौ॥ॐप्रंनमःवा ११ॐ
मबाहौ॥ॐचोंनमःहृदये॥ॐदंनमःदक्षिणहस्ते॥ॐयोंनमःवामहस्ते॥

२धीमहिकंठाय॰धियःनासायाय॰यःचक्षुर्भ्यांन॰नःललाटायनमः॥ २
णि

इत्यक्षरंन्यासंकृत्वातत् पद्भ्योंनमः॥सवितुःजंघाभ्योंनमः॥वरेंयंकट्यै
नमः॥भर्गःनाभ्यै॰देवस्यहृदयायं॰प्रेंदयावमूर्ध्नेनमः॥इतिषडंगं न्यासंकृत्वातत्सवितुर्हृदया॰वरेणियंशिरसेस्वाहा॥भर्गोदेवस्यशि
खायैवषट्॥धीमहिकवचायहुं॥धियोयोनेत्रत्रयायवौषट्॥प्रचो नः
दयात्अस्त्रायफडितिषडंगंन्यासंकृत्वा॥ॐतत्सवितुर्वरेणियंना
भ्यै॰ॐभर्गोदेवस्यधीमहि॥हृदयायनमः॥धियोयोनःप्रचोदयात्
कंठायनमइतिपादंन्यासंकृत्वा॥आगच्छवरदेदेविजपेमेसंनिधोभ
य वा॥गायंतंत्रायतेयस्माद्गायत्रीतितताःस्मृता॥ॐओजोसिसहोसि

आ॰ क॰ बलमसि भ्राजोसि देवानांधामनामासि विश्वमसि विश्वायुःसर्वमसि सर्वा
१२ युरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाह
यामि श्रियमावाहयामि छंदर्षीनावाहयामि इत्यावाह्य
॥ सवितुर्देवस्यवरेण्यंतेजोध्यायेमहियोस्माकंकर्म णिप्रेरय तीतिगायत्री
मंत्रार्थं स्मृत्वाबालांबालादित्यंजलमध्यस्थंरक्तवर्णंरक्तांबरानुलेपन
स्रगाभरणांचतुर्भुजांदंडकमंडल्वक्षसूत्राभय कैंचतुर्भुजांहंसासनारू रं
ढांब्रह्मदैवत्यांऋग्वेदमुदाहरंतीभूर्लोकाधिष्ठात्रीगायत्रींनामदेवतां १२
ध्यात्वोष्टोत्तरंशत मष्टाविंशति दशवारंवा गायत्रींजप्त्वापुनः
सहस्र मष्टोत्तर१

षडंगंन्यासंकृत्वाजातवेदसेइतिमंत्रस्यमारीचःकश्यऋषि र्जातवेदाग्निर्दे
वतात्रिष्टुप्छंदः॥तच्छंयोरितिमंत्रस्यशंयुर्ऋषिः विश्वेदेवादेवताराक्करीछंदः
नमोब्रह्मणइतिमंत्रस्यवामदेवऋषिःलिंगोक्तदेवतात्रिष्टुप्छंदः॥सं
ध्योपस्थानेविनियोगः॥इदमुभ्यार्यंजातवेदसेतच्छंयोरितिद्वाभ्यांत्रिःपठि
तेननमोब्रह्मणेनमइतिमंत्रेणउपस्थायमित्रस्येतिचतसृणांविश्वामि
त्रऋषिःमित्रोदेवतागायत्रीछंदःमित्रोपस्थानेविनियोगइदमुभ्यार्यमि
त्रस्येतिचतसृभिरादित्यमुपस्थाय॥ॐभूःॐभुवःॐस्वःॐभूर्भुवः

स्वस्ति॰चतस्रभिश्चतारिप्रदक्षिणानिकृत्वा॥ऐंदिशेइंद्रायनमः॥अग्ने
येदिशेनमःअग्नयेनमः॥दक्षिणस्यैदिशेनमःयमायनमः॥निर्ऋत्यैदिशे॥
निर्ऋतयेनमः॥प्रतीच्यैदिशेवरुणाय०॥वायव्यैदिशेवायवेनमः॥उदीच्यैदि
शेसोमाय०॥ईशान्यैदिशेईशानायनमः॥ऊर्ध्वायैदिशे॥ब्रह्मणेनमः॥अध
रायैदिशेअनंतायनमः॥इतिमंत्रैःसाधिपाः॥पूर्वादिशेनवासंध्यायै० दि
सावित्र्यै०गायत्र्यै०सरस्वत्यै०सर्वाभ्योदेवताभ्योनमः॥इत्युर्व्या॥उत्तमेशि १३
खरेइत्यनुवाकस्यवामदेवऋषिः॥गायत्रीदेवता॥अनुष्टुप्छंदः॥गा

शांतिः शां तिः

यज्ञुद्वासनेविनियोगःसुस्नायतेनमंत्रेणगायत्रीमुद्वास्यभद्रंनोअपितय
मनः॥शांतिरित्युच्चार्यायासदासर्व०शिवायविष्णु०यथाशिवमयविष्णु०
ब्रह्मण्योदेवकीपुत्रो०नमोब्रह्मण्यदेवाय०क्षीरेणस्नापि०आकाशात्पतितं०
सर्ववेदेषुयेनमः॥नमोस्त्वनंतायेतिमंत्रान्जपित्वास्वगोत्रनामोच्चार्यो
हंभोअभिवादयइतिहस्ताभ्यांकर्णौस्पृष्ट्वापादौभूमिंचस्पर्शनंअभि
वादयेवमेवगुर्वादीनप्यभिवाद्यपवित्रग्रंथिंविस्रस्यशुचिदेशेतक्षिपेत्॥
आशौचेतुअर्घ्यदानांतंमनसोच्चारयन्कृत्वार्घ्यमंत्रोच्चारणपूर्वंकृत्वा

आ॰क॰ दशवारं गायत्रीजपंमनसा कुर्यात्॥इतिप्रातःसंध्या॥अथोपासनं॥यज्ञ
१४ मानःसुचिरुदयात्पूर्वमग्निंप्राङुखस्यसमित्समरोपपक्षेतुप्रत्यवरोहे
तिहिरंण्यगर्भऋषिःअग्निर्देवतात्रिष्टुप्छंदः॥अग्निप्रत्यवरोहणेविनियो
गःइत्युच्चार्यतेनमंत्रेणलौकिकाग्नौपूर्वदिनेसमारोपिताग्निसमिधमा
धायउदयानंतरमग्नेःपश्चिमतउपविश्यआचम्यप्राणानायम्यमोपात
रौपा३दुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातर्सन्ध्योपासनहोमंकरिष्येइतिसंकल्प्यस
करि२मस्यहोमेतुसायंप्रातरुपासनहोमोसमस्यैधेइतिसंकल्प्यचत्वारि १४
शृंगाधामदेवोग्निस्त्रिष्टुप्॥अग्निमूर्त्तिध्यानेविनियोगः॥चत्वारि

पउपस्टरया३

शृंगेसमिमूर्त्तिंध्यात्वापरिसमुह्यपरिस्तीर्यपर्युक्ष्यपात्राणिहितान्प्रोक्षाति
तसिततंडुलान्नेरुत्तरतोनिधायस्वतंत्रंदर्भेणावज्वाल्यप्रोक्ष्यतेनैवो
ल्मुकेनत्रिःपर्यग्निकृत्वोल्मुकंनिरस्याग्नेःपश्चिमतःकुशेषुसमिधासह
हविर्निधायविश्वानिनइतितिसृभिरग्निमक्षतैरभ्यर्च्यदक्षिणंजानु
च्यसमिधंतूष्णीमग्नौनिधायसततंडुलान्दक्षिणपाणिनादायपाण्डु
तरपार्श्वेनाग्नयेस्वाहेतिहुत्वाउनस्तथैवप्रजापतयेइतिमनसा
स्मरन्स्वाहेत्युच्चार्यद्वितीयामाहुतिंहुत्वाउनःपरिसमूहनपर्यु

आ॰क॰ क्षणंचेत्प्रातराहुतीर्हुत्वापूर्ववदुपविश्यपरिस्तरणंविसृज्यपरिसमु पर्युक्ष हन
१५ क्षणेकृत्वा अग्न्यायूंषीतितिसृणांप्रातर्वैरवीनसाऋषि
यः पवमानोग्निर्देवतागायत्रीछंदः अग्नेत्वंनइतिहाभ्यांगोपायनाऽऽपायय
नावबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुरितिऋचांऋषयःअग्निर्देवताद्वि
पदाविराट्छंदः प्रजापतेनत्वदितिमंत्रस्यहिरण्यगर्भऋषिः प्रजापति
र्देवतात्रिष्टुप्छंदः तंतंत्वंनितिमंत्रस्यदेवाऋषयःअग्निर्देवताजगतीछं
मंत्रस्य दः हिरण्यमेगइतिहिरण्यगर्भऋषिः प्रजापतिर्देवतात्रिष्टुप्छंदःउपस्या १५
नेविनियोगः एतैर्मंत्रैरुपस्थायप्रातस्तुसूर्योनइतिमंत्रस्यसोर्यश्चक्षु

र्ऋषिःसूर्योदेवतागायत्रीछंदःउदुत्यमितिमंत्रस्यकाण्वःप्रस्कण्वऋषिःसू
र्योदेवतागायत्रीछंदः॥चित्रंदेवानामितिमंत्रस्यांगिरसःकुत्सऋषिःसूर्यो
देवतात्रिष्टुप्छंदः॥तच्चक्षुरितिमंत्रस्यसौर्योमित्रपाऋषिःसूर्योदे
वताजगतीछंदःविनियोगःप्राग्वत्॥एतैर्मंत्रैःप्राजापत्याभ्यांचोपस्था
यसमस्यहोमेतुहविष्पांतमितिपंचर्चस्यसूर्योमूर्धन्वामदेवऋषिः॥ स्यन्च॰
सूर्यवैश्वानरौदेवतात्रिष्टुप्छंदःविनियोगःप्राग्वत्॥अनेनसू
र्येनप्राजापत्याभ्यांचोपस्थायोपविश्यमानस्तोकइतिभस्ममा

आक दाय॥ आयुषमि त्यादि विर्यथास्थानंष्ट्वाऊंचमेइत्युपस्थायाभिवादये
१६मं तू॥ एवमुपासनहोमंकृत्वाप्रवास्तादोप्राप्तयंतेयोनिरितिमंत्रेणगार्हपत्यो विश्वा स्य
मित्रऋषिःअग्निर्देवतानुष्टुप्छंदः समिध्यग्निसमारोपणेविनियोगः॥अ
ग्नेनमंत्रेणसमिध्यग्निसमारोपयेत्॥होमातिक्रमेममनित्यहोमातिक्रम
दोषः परिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रायश्चित्तपूर्वकंहोमंक
रिष्येइतिसंकल्प्यपरिसमूहनादिकृत्वोत्तरतोःसपवित्रेनिहितमा पा
ज्यमायतनंधृहिकृतेषंगरेषुविलप्यावज्वाल्यदर्भैग्रहूयंत्रास्यते १६
नेवज्वलतोऽमुकेनत्रिःपर्यग्निकृत्वाकर्षेनिवोदगुद्वास्यो गारा नग्ना

वतिसज्यसवितुष्टेतिसकृत्स्रुचौचहिरुत्सृजपवित्रेप्रोक्ष्याग्नेःप्रहृत्याज्यं
पश्चिमतःकुशोपासादयसंस्रवेनस्रुवेणतदाज्यंसंमृष्टायांसुचिचतुर्गृहीतं
गृहीत्वामनोज्योतिरितिमंत्रेणसकृच्छुक्वातीतकालसंख्याहोमान्कृत्वा
तत्कालहोमादिसर्वं कुर्यात्॥॥इतिहोमोपासनंतत्रो पासनाग्नि
जंभस्मंवामहस्तेधृत्वादक्षिणहस्तेनाछाद्याग्निरितिभस्मधा रितिभ यु
स्मजलमितिभस्मा स्मजलमितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्म
मनएतानिचक्षूंषिभस्मे तिमंत्रेणत्रिं भिमंत्र्यत्र्यंबकमंत्रेणजलेनमि गारम
ना श्रयित्वा मिकामध्यमातर्जनीभिर्भालंहृन्नाभिकंठदक्षिणबाहुमूल

मध्य मणिबंधनामबाहुमूलमध्यमणिबंधपृष्ठशिरस्स्थानेषुप्रणवे
नविन्यान्न्यस्तादयोप्येवमेवोर्ध्वेषुपुंड्रं तेम्निहोत्रादिजंभस्मवि
भ्रयुः॥ततोविघ्नेशशिवगणेशसूर्यदुर्गास्त त्तन्नतिमासुविघ्नेश्वि
गणेशसूर्यदुर्गाभ्योनमइति मंत्रेणसहस्वशीर्षेतिषोडशऋ
ग्भिर्वाआवाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रयज्ञोपवीतचंद
नपुष्पधूपदीपनैवेद्यप्रदक्षिणानमस्कारपुष्पांजल्यषोडशोप
चारैरभ्यर्चगुरूंश्चसंपूजिंचि द्वाह्मणायदत्वादर्पणमणिघृता १७
ज्यगुर्वादिमंगलद्रव्याणिदृष्ट्वाध्ययनाध्यापनाभ्यांवेदाभ्यस्य न

कुटुंबभरणार्थमनिषिद्धं जीविकयाधनमर्जयित्वामध्याह्नेप्रति
पत्षष्ठ्येकादशीरविभौमगुर्वारभरणीकृत्तिकामघानक्षत्र
मन्वादियुगादिव्यतिरिक्ततिथौमृत्तिकास्नानंकुर्यात्॥तत्रप्रक्षा
लितमुखपाणिपादआचांतोबद्धशिखःशुचौतीरेशुद्धमृत्तिको
तंदृष्ट्वयवतिलांश्चनिधायघ्राणानाय्यदेशाकालौस्मृत्वा
ममसमस्तपापक्षयायुरत्तिवृद्धिद्वारास्त्रीपरमेश्वरप्रीत्यर्थं
मृत्तिकास्नानंकरिष्येइतिसंकल्प्यअश्वक्रांतेरथक्रांतेविष्णुक्रांतेव

आ॰क॰ सुंधरा॥ शिरसाधारयिष्यामि रक्षस्व मांपदे पदे॥उ॰ कृतासिव
१८ण राहे॰ कृष्णेन शतबाहुना॥ मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥
कृतं मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतं यद्वाहतेनपापेनसर्वपापैः प्रमुच्य
ते॥इत्यभिमंत्रितांमृत्तिकांगायत्र्याप्रोक्ष्यदक्षेनगायत्रीशिरसान्ते
धाविभज्यैकेनभागेनमूर्धादिनाभ्यंतंद्वितीयेननाभेरधःपाद
पर्यंतंसर्वांगमनुलिप्यास्वापुत्सप्रक्षाल्यस्नात्वाद्विराचम्यतती १८
वेव यभागंपाणा॰ ओंभूःओंभुवःओंस्वरित्युदकूसंस्पृशेत्रेधा

म विभज्यदक्षिणभागंआस्यायफडितिदशदिक्षुनिक्षिप्योत्तरभागंतृती
यंतूस्मीक्षिसामध्यभागंहस्ताभ्यांगायत्र्यादित्यादशर्षिस्रोतेनसर्वां
गंगायत्र्यामणवेनवानुलिप्यसुमित्र्यानःआपओषधयःसंतुइतिद
क्षिणेनपाणिनाङ्घिरात्मानंपरिषिंचयदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयं
द्विष्मइतिगुदेपजलेनप्रक्षाल्यवरुणप्रार्थनादिवस्त्रनिष्पीडनवर्जंजं
घपादप्रक्षालनांतेपातःस्नानवत्कृत्वामृत्तिकास्नानंनिष्कृतिर्थोगुन॥
अलेनेयपातःस्नानंकृत्वोर्ध्वपुंड्रंधृत्वामध्याह्निकसंध्यावंदनंकुर्यात्॥अ
थप्रर्ववद्विराचम्यप्राणायम्यउपास्तेत्यादिमध्याह्नसंध्यामुपासिष्येद
मितिसंकल्प्यप्रर्ववदेवमार्जनंकृत्वाआपःपुनंत्वित्यनुवाकस्यनारायण
र्षिः॥आपोदेवताअष्टीछंदः॥मंत्राचमनेविनियोगःदक्षआर्षआपःपुनं

सिलिलमंत्रेणापःपीत्वाद्विराचम्यपूर्ववद्विराचम्यपूर्ववद्द्वितीयमार्जनाद्यघमर्षणंकृत्वा॥ हंसःशुचिषदितिमंत्रस्यगौतमपुत्रोवामदेवऋषिः॥ सूर्योदेवता॥ जगतीछंदः॥ सूर्यायार्घ्यदानेविनियोगःऋक्षाद्यर्थंतेनमंत्रेणसकृदर्घ्यंदत्वा॥ द्विराचम्यउद्वयमितिचयोदत्रार्चस्यसूक्तस्यकण्वःप्रस्कण्वऋषिः॥ सूर्योदेवतानवयोगायत्र्योस्याश्चतस्रोनुष्टुभः॥ चित्रंदेवानामितिषष्ठ्यर्चस्यांगिरसःकुत्सऋषिःसूर्योदेवतात्रिष्टुप्छंदः॥ हंसःशुचिषदितिमंत्रस्यगौतमपुत्रोवामदेवऋषिःसूर्योदेवताजगतीछंदः॥ सूर्योपस्थानेविनियोगःऋक्षाद्युच्चार्य॥ उद्वयमित्यंत्रमितिहंसइतिमंत्रेणादित्यमुपस्थायपूर्ववदाचमनभ्रूतशुध्यादिसंध्यांस्मरणंतेकृत्वाध्रुवतीध्रुवादित्यमंडलमध्यस्थांश्वेतवर्णांश्वेतांबरांश्वेतांबरैर्विलेपनांपंचवक्त्रांत्रिनेत्रांचिंतयेत्॥ चंद्रोवरांत्रिभूलंखड्गंखेटंगदामर्वकंचतुर्भुजांकृष्णाजिनासनांकृष्णैर्दंष्ट्रैर्भयंकरैःपशुवेदमुद्राहरंतीं ध्रुवलोकाधिष्ठात्रीसा १९

वित्रीनामदेवतांध्यात्वाप्रवक्ष्यामीतिबीजपंक्तिंचोक्त्वांतेषडंगन्यासंकृत्वाअस्त्रायफडितिदिग्बंधंकृत्वाद्विराचम्यप्राणायाम्यमंत्रेणप्राणायामंकृत्वाश्रीपरमेश्वरमीप्सितंधर्मंब्रह्मयज्ञेनयक्ष्येइतिसंकल्प्यविष्टरसीतिमंत्रस्याग्निर्ऋषिः॥ वरुणोदेवतानुष्टुप्छंदः॥ उद्वयंकोपस्पर्शनेविनियोगः॥ ॐविष्टरसिविष्टरंमेपाप्मानमृतात्सत्यमुपैमीतिमंत्रेणापउपस्पृश्यपूर्ववदाचमनंकुर्यात्॥ चिरापःप्राश्यांगुष्ठतलेनद्विरोधरोष्ठौहस्ततलेनमुखमुन्मृज्यदक्षिणहस्तेनजलंगृहीत्वासव्येनसव्यंपादंपाणिंप्रोक्ष्यदक्षिणहस्तेनजलंगृहीत्वासर्वांगुलीभिःशिरःअंगुष्ठानामिकाभ्यांचक्षुषीअंगुष्ठतर्जनीभ्यांनासापुटेअंगुष्ठानामिकाभ्योश्रोत्रेहस्ततलेनहृदयंउपस्पृश्यपूर्ववत्॥ ततोपउपस्पृश्योपतिष्ठेत्॥

आ॰क॰ दक्षिणजानुनी कृत्वा पवित्रद्वयं गर्भभागंगुलिमुक्तान पाणिं सव्येनिधापयतु
२० परिदक्षिणं पाणिंभागंगुलिकमेवन्यंचंनिधाय॥ प्रणवस्यब्रह्मा ऋषिः अग्निर्दे
वतागायत्रीछंदः गायत्र्यागाधिनो विश्वामित्र ऋषिः सवितादेवतागायत्रीछंदः
व्याहृतीनांपरमेष्ठी प्रजापतिर्ऋषिः प्रजापतिर्देवताबृहतीछंदः गायत्र्यागाधि
नोविश्वामित्र ऋषिः सवितादेवतागायत्रीछंदः॥ अग्निमीळइत्यादीनांछंदसां
मधुछंदादय ऋषयः अग्न्यादयोदेवताः गायत्र्यादीनिछंदांसि। ब्रह्मयज्ञेवि जपे
नियोगः इत्युक्त्वा पंचसप्रणवव्याहृतिपूर्वंत्रयऋचः गायत्रीं अग्निमीळ
इतिवर्गद्वयंयथाक्रमान्मन्यध्वंपितरोनमोवःइति परिधानीयांचिरोंत
सदितिचोत्तरार्धदृष्टिरसीतिमंत्रस्याग्निर्ऋषिः प्रजापतिर्देवतानुष्टुप्छंदः २०
उद्भवोपस्पर्शनेविनियोगः दृष्टिरसिदृश्यमेषा प्राणस्यसोमस्यतनूरसिंहं
सेणाऽऽपस्पृशेत्॥ एवंब्रह्मयज्ञंकृत्वोपवीतीभूत्वाऽऽचम्यऋषिः सासतानि

दृष्टिःसम्यान्वारब्धदक्षिणपाणिना॥ ब्रह्मापतिस्तृप्यतु॥ ब्रह्मास्तृप्यतु॥ वेदास्तृ
देवाः॰ प्यंतु॥ ऋषयः॰ सर्वाणिछंदांसि॰ ओंकारः॰ वषट्कारः॰ व्याहृतयः॰ सावित्री॰
पत्नाः॰ द्यावापृथिवी॰ अंतरिक्षं॰ अहोरात्राणि॰ सांवत्साराः॰ सिद्धाः॰ समुद्रा॰
नद्यः॰ गिरयः॰ क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसः॰ नागाः॰ वयांसि॰ गावः॰
साध्याः॰ विप्राः॰ यक्षाः॰ रक्षांसि॰ भूतानि॰ एवमंतानितृप्यंतु॥ इहलोकचिंता
मणेः कुशाग्रेदेवतीर्धमिकैकमंजलिंदद्यात्॥ एतंदेवतर्पणंकृत्वानिवीतीयु
दगग्रमुखः सव्यजानुरृषितर्पणंकुर्यात्॥ मरीचिः॰ मध्यमाः॰ वत्समदः॰ विश्वामित्रः॰ गा
मदेवः॰ अत्रिः॰ भरद्वाजः॰ वसिष्ठः॰ प्रगाथाः॰ पावमान्यः॰ क्षुद्रसूक्ताः॰ महासू
क्ताः॰ तृप्यंतिमिहदर्शमेनेनकामध्येनसाऽपत्नीधेनुहोहवंनदीदयात्॥
एवंऋषितर्पणंकृत्वाप्राचीनावीतिदक्षिणाभुरुयोन्याचिनसव्यजानुःसनिला
ऽग्निरृषिः॥ सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्मा॰
र्यास्तृप्यंतु॥ जानंतिमाहविगार्ग्यगोतमशाकल्यबाभ्रव्यमांडव्यगार्ग्यकौथुमराणा

गर्मिणीचक्रवीत्यप्तु। वडवामातीर्थेतीत्यप्तु। सुरभ्यामेरेयीत्। कहोळंतर्पयामि। कोपीतकं। महाकोपीतकं। पेंग्यं। महापेंग्यं। सुयत्ते। सोरभ्यायने। एतरेयं। महैतरेयं। शाकलं। वाष्कलं। सुजातवक्त्रं। औदवाहिं। महौदवाहिं। सौजामिं। रौद्रीनर्कं। आश्वलायनं। येचान्येआचार्यास्तेभ्यस्तृप्यंतितृप्यंतितृप्यंतितर्पयामि। मंत्रैर्हिरण्यगर्भकुशदूर्वाभ्यांपितृतीर्थेनत्रीस्त्रीन्देवतीर्थेनजलंदत्वा। स्मृतिपरंअमुकशर्माणंअमुकगोत्रंअमुकप्रेतस्वधानमस्तर्पयामीत्यादिप्रकारेणपितृपितामहप्रपितामहमातृपितामहीमातामहमातुःपितामहमातुःप्रपितामहमातामहीमातुःपितामहीमातुःप्रपितामहीपितृव्यतत्पत्नीर्भ्रातृतत्पत्नीर्मातुलतत्पत्नीःपितृष्वसामातृष्वसाआत्मभगिनीदुहितृश्वशुरतत्पत्नीराचार्योपाध्यंतत्पत्नीर्दत्त्वासाधारणपितृन्साधारणपितृन्देवतर्पयेत्॥ अत्रतर्पणेरुपवस्त्रमितिहेमाद्रिः॥ नवस्त्रमितिमयोगपारिजाते॥ ततःश्राद्धसंकल्पंकृत्वा

सापत्नमाता

२१

तत्रतिलाजातानितिमंत्रेणस्नानवस्त्रंचतुर्गुणंउपरिदत्त्वातेनिष्पीड्यवामभ
कोष्ठेनिक्षिप्यउपवीतीदक्षिणाग्रोदकपुष्पतुलस्यादिदेवपूजासाधनंगृही
त्वागृहंगत्वापूर्ववद्देवपूजांकृत्वादेवयज्ञभृतयज्ञपितृयज्ञवैश्वदेवंकुर्यात्॥ ॥
ततश्चकुंडेस्थंडिलेवापचनाग्नौसंस्कृतंतप्तंश्राद्धान्नंगुरवेउपविश्यकुशपाणिःप्रा
णानायम्यदेशकालौसंकीर्त्यममपुत्रस्यसंस्कारान्नसंस्कारद्वाराश्रीपरमेश्वर
प्रीत्यर्थंवैश्वदेवेनपक्ष्यइतिसंकल्प्यसुष्ठूदमूनाएत्यग्नइतिद्वाभ्यामग्नि
कृत्वोद्दीप्यतत्रास्त्रंगेत्यग्निमभिमंत्र्यात्रेरीशानींदिशमारभ्यचिरैभ
सापरिसमुह्यतथैवपरिषिच्यविश्वानिनइतिद्वाभ्यामग्निमभ्यर्च्यपुष्पैरभ्यर्च्यह
विष्यसिधानंपथकृत्वानिक्षिप्यतत्राग्नावधिश्रित्यौदकंहुत्वाग्नेः
पश्चिमतोनिधायतदन्नेत्रेधाविभज्यत्रिःपर्युक्षंकृत्वासर्पिषाभ्यक्तपा
णितलेहृदिन्यस्यदक्षिणभागस्थदर्भाग्रैःपिंडप्रमाणमन्नमादायसा

सोमाय वनस्पतये स्वाहाग्नीषोमाभ्यां इंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरये इंद्राय विश्वेभ्यो देवेभ्यो बलेन इति मंत्रेण हुत्वा
पुनर्हुत्वा परिसमूहनपर्युक्षणेक्षवाविभूतिधारणंकृत्वोपसर्जनपात्रायां तेषु पक्षि
मतःशुद्धदेशोजलं परिषिच्य मध्यभागस्थदर्भा बदरीफलमात्रमादायः
प्रागादीशानांतं चक्राकारेण रेतर्पणं स्वाहाग्नेः प्रतीक्षेदर्भा ग्रंथिवन
स्पतिभ्योगृहायगृहदेवताभ्यो वास्तुदेवताभ्यः इति पंचभिर्बलीन्हुत्वा चक्रा
द्दिः प्राच्यां प्रागग्रसंस्थं इंद्राय इंद्रपुरुषेभ्यदक्षिणतउदक्संस्थं यमाययमपुरु
षेभ्यः पश्चिमतः प्रागग्रसंस्थं वरुणाय वरुणपुरुषेभ्यः उत्तरेणउदग्ग्रसंस्थं सोमा
यसोमपुरुषेभ्यः चक्रमध्येब्रह्मणेब्रह्मपुरुषेभ्यो दक्षिणतोविश्वेभ्यो
देवेभ्यः तत्पश्चिमतः सर्वेभ्यो भूतेभ्यो नुत्तरतोदिवाचारिभ्यः तद्बहिरीशा
न्यां रक्षोभ्यइतिच स्वाहेतेभ्यश्चदर्भामंत्रैः बलीन्हुत्वा नेयाभिमुखैः प्राचीनावीतीनाभिमंत्रान्वाच्योत्तरभागस्थदर्भादगुष्ठपर्वमात्रमग्नेपरिग्रहज २२

लेनापसव्यंपितृभ्यइतिमंत्रेणचक्राद्बहिर्पितृतीर्थेनबलीन्हुत्वोत्तर
भागन्नैर्ऋतिकोणेत्रामायस्वाहेतिवायव्यकोणेत्रावत्सायस्वा
हेतिमंत्राभ्यांबलीन्हुत्वातत्रैवेषणगृहाजिरेभ्यःभोजनसामग्रीच्यकाकेभ्यो
नुद्धरंतीबलिंहरेत्॥नित्यश्राद्धेत्वामनुष्ययज्ञार्थमतिथिमभ्यागतमासा
दुरवउपविश्यनिवीतीभोजनपर्याप्तमन्नंतत्तन्नकादिभ्यइदंनमइत्यन्नातेन
भोजयित्वातदभावेगोभ्योदत्वाथवान्नभोजयित्वास्वासने प्राङ्मुखउपवि
श्यभुंजीथाःकारिणमंडलंकृत्वापालितानिकोरुस्थानिमहापात्रलघुपात्रा
णिसन्निधायतत्रस्थाभ्यां याद्भिर्भक्ष्यैर्दक्षिणभागेपेयलेह्यचोष्यभा
गैःपरिवेषणंनतोन्नं मध्येपरिषेच्यप्रणवव्याहृतिपूर्वकंसाविज्यान्नमभ्यु
क्ष्यसत्येत्वर्तेनपरिषिंचामीतिदिवाऋतेत्वासत्येनपरिषिंचामीतिराज्ञोमदक्षि
णमन्नंपरिषिच्यपात्रदक्षिणेभूमावुदकधारांकृत्वातन्नमोनेभ्यःपतये

भुवनपतयेभूतानांपतयेधर्मदेवायचित्रगुप्तायेतिपंचभिर्यत्रैकच
नसंस्थानांसुरक्षोपद्रहतात्मनां॥प्रेतानांतृप्तयेक्षम्यमिदमस्तुयथासु
खंइतिमंत्रेणाभ्यक्तान्नेनमाकूसंस्थाप्यवलीन्हृत्वापुनस्तूष्णीमुदकधारां
दत्वाआपोशनार्घंजलंगृहीत्वावामहस्ता[illegible]नाभिकांगुष्ठेभोज
नभाजनमालभ्यामृतोपस्तरणमसिस्वाहेतिमंत्रेणनिःशेषंतदन्नं
पीत्वातर्जन्यमध्यमांगुष्ठैरोंप्राणायस्वाहामध्यमानामिकांगुष्ठैरोंअपा
नायस्वाहाअनामिकापाकनिष्ठिकांगुष्ठैरोंव्यानायस्वाहाकनिष्ठातर्ज
न्यंगुष्ठैरोंउदानायस्वाहासर्वांगुलीभिरोंसमानायस्वाहा॥ॐब्रह्मणे ३
स्वाहेतिषड्भिर्मंत्रैरुच्यालमनेप्रवीहुतिमुत्सृज्यतःप्रक्षाल्यजिह्वेचुलु
तदुदकंभूमौप्रतिष्ठापयभोजनपात्रंमपरिस्यज्यभुक्त्वापात्रस्थान्नविशिष्टान्ना २३
त्सर्वस्मात्किंचिदादायाग्नयेस्विष्टकृतेभागधेयेभ्योभूमौस्थले

नरापोशनार्घमप्रक्षालितएवपाणावुदकंगृहीत्वास्रुतापिधानमसिस्वा
हेतिमंत्रेणसर्वंपीत्वाशेषंवेश्वानिलयेपात्रंदत्वाचमनंदत्वा॥अर्घिना
मुदकंदानमक्षैर्यमुपतिष्ठतइतिमंत्रेणावशिष्टंपितृतीर्थेनभूमौनिषिच्य
तत्रैवपात्रंनीत्वाआचम्याधायस्रासनेउपविश्यअग्निरग्निर्वऽयानळ
ग्नयेकव्यवाहनायस्वाहेत्यग्नौ॥सुरांमंसमेतत्पितृणामक्षय्यंभवंनवपस्तरणं
ममचास्तुदेहंइतिमंत्रेणोदकंपरिषिच्यमांसंभक्षयित्वापुराणपठणादि
भिर्दिनशेषमतिवाह्यास्तमयात्पूर्वमेवशौचादिनियमपूर्वंसायंसंध्या
मुपासयेत्तूष्णीं॥द्विराचम्यउपांशुसायंसंध्यामुपासयिष्येइतिसंकल्प
मध्यमार्जनेतत्तोग्निश्चेतिमंत्रस्यपात्रवत्स्यउपनिषद्ऋषिःअग्निर्मामन्यु
मन्युपतिर्देवताअग्निश्चेत्सारस्यरक्षंतामित्रंतेचतुर्थीकालक्षरागायत्र्यार्य
दनेत्सारस्यमयीस्तंतंपंचपदापंक्तिःइदमहमित्सारस्यस्वाहेस्तंतंदत्ता

सूत्रपदाभ्यामुपेतावितूछेदः मंत्राचमनेविनियोगः॥अग्निर्भ्रूयमामन्यु
श्चमन्युपतयश्चमन्युकृतेभ्यः॥पापेभ्योरक्षांयद्दापापमकार्षंमनसा
वाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नाअहस्तदवलुंपतुयत्किंचदुरितंमयि
इदमहंमामममयोनौसत्येज्योतिषिजुहोमिस्वाहेतिमैत्रेणाचमनंकृत्वा
हिराचम्यहि ... तीयमार्जना ... दिमंत्रार्थस्मरणांतंकृत्वादृङ्मृ
दिमेऽक्षतांश्चयामवर्णांश्चयामोवराङ्गेपनक्षत्रमालाभरणामेकवक्त्रांं
चतुरंगदापद्मांकचतुर्भुजांगजासनारूढांविष्णुदैवत्यांसामवेदमुदा
हरंतीस्वर्णकांतिंश्रीसरस्वतीनामदेवतांध्यात्वागायत्रीजपादिसं
ध्योपस्थानांतंकृत्वाइमंमेवरुणेतिमंत्रायामीतिचोअग्नीगतिंभुनःप्रत्य
षिःवरुणोदेवतात्रिष्टुप्छंदोवरुणोपस्थानेविनियो
गइत्यृङ्मार्जनोद्वयेनोपस्थायोरुमित्यादिभिःप्रदक्षिणाचतुष्टयंकृत्वा

मस्मरणादिद्वाःसाधिपात्वासंध्यानमस्कारयमिवादनोंत्रावलुर्यात्॥॥ नं
मः...त्वपरितुमातःसंध्योपासनानेनरंथमग्निकार्यंकुर्यात्॥हिराचम्यप्रा
णानायोपोनत्याहिमातरग्निकार्यंकरिष्येइतिसाधमितिचसंकल्प्य॥परिसम्
हनपर्युक्षणंकृत्वाविश्वानिनइतिसूक्तस्यमाधुच्छंदसऋषिःअग्निर्दे व
तात्रिष्टुप्छंदःभस्मधारणेविनियोगइत्युक्त्वाभस्मादायाभिरग्निमक्षतैरभ्यर्च्य
अग्नेयमिधमितिमंत्रस्यहिरण्यगर्भऋषिःअग्निर्देवतात्रिष्टुप्छंदःसमि
दाधानेविनियोगःइत्युक्त्वाकर्तेनमंत्रेणसमिधमाधायान्वारब्धेनम
गस्तुआर्यायेणपाणिनाग्निंस्पृष्ट्वातेजसामासमनुमीतिमैत्रेणसंहतेनदक्षिण
रजनाडिंस्पृष्ट्वापाणिंप्रक्षाल्यपुनरेवंहिःकृत्वामयिमेधामितिपूर्णाहिरण्यगा
र्भऋषिःपूर्वेपंचपाणामग्नीद्वंद्वयेदेवताउत्तरत्रयाणामग्निर्देवतागायत्रीछं
दःअग्नुपस्थानेविनियोगइत्युक्त्वार्यतेनमंत्रेणाग्निमुपस्थायमानस्तोकइति

मंत्रस्यकुत्सऋषिःऋग्वेदोदेवतागायत्रीछंदः॥विभ्रतिमहणेविनियोगःऋग्वेदस्यार्ष
मेनमंत्रेणभस्मादायत्र्यायुषमित्यादिनिर्यथाशक्तिभस्मधृत्वापुनःस्नानं परि
हृत्यपुरुषसूक्तेनोक्तोत्तरमंत्रादिनाग्निमुपस्थायाभिवादयेत्॥इत्याग्निकार्यं॥५
अथोपासनानंतरंभानुवारपर्वणिसंक्रांतिव्यतीपातेषटतिश्राद्धदिनात्पूर्व
दिनात्तिरिक्तदिनत्रयीपूर्वोक्तनियमेनलघुहविष्यभोजनंकृत्वाअथपौम
माश्रांतिश्राद्धायनगृह्यंगास्वास्तीर्यशय्यायांसुपवित्रपनर्मदायैनमः
प्रातर्नर्मदायैनमोनिशि॥नमोस्तुनर्मदेतुभ्यंत्राहिमांविषसर्पतः॥जरत्कारो
र्जरत्कार्योसमुत्पन्नोमहायशाः॥आस्तीकःसत्यसंधोमापन्नगेभ्योभिरक्षतु॥
भगस्तीमाधवश्चैवमुचुकुंदोमहाबलः॥कपिलोमुनिरास्तीकःपंचैतेसुखदा
पिनः॥इतिमंत्रंजपित्वाप्राङ्मुखोदक्षिणाननएवाकाशस्थेतु॥ततोमध्य
रात्रोतेश्राद्धांतरेस्त्रियः ऋतुदर्शनमारभ्यादिनचतुष्टयेकादश्याश्चयो २५
दश्यादिनात्तिरिक्तेवाउत्तरादिनमध्येचतुर्थीपंचम्यामनुदर्शीमेचदर्शीश्राद्धत

श्रीगणेशायनमः॥यांसदा॥शिवायविष्णुरूपायशिवरूपायविष्णवे॥
शिवस्यहृदयंविष्णुविष्णुस्यहृदयंशिवः॥१॥यथाशिवमयंनि
ष्णुसर्वंविष्णुमयंजगत्॥यथांतरनपश्यामित्वय्यामेस्वस्तिरा
युषः॥२ब्रह्मण्यादेवकीपुत्रोब्रह्मण्योमधुसूदनः॥बह्मण्यःपु
ंडरीकाक्षोब्रह्मण्योविष्णुरच्युतः॥३॥नमोब्रह्मण्यदेवायगो
ब्राह्मणहितायच॥जगद्धिताय कृष्णायगोविंदायनमोनमः॥४॥
क्षीरेणस्नापितेदेवीचंदनेनविलेपिता॥बिल्वपत्रार्चितेदे
वीदुर्गेहंशरणागत॥५॥आकाशात्पतितंतोयंयथागच्छ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पर्वनोपवासदिनश्राद्धनिमंत्रितदिनानुद्दिष्टदिनानि रविभौमवारभरणीकृत्ति
कामघापूर्वफाल्गुनीविशाखारवाज्येष्ठामूलपूर्वषाढापूर्वभाद्रपदाश्विजन्मर्क्षदुष्ट
र्सक्रांतिव्यतिपातवैधृतियोगव्यतिरिक्तदिनेपुत्राधौपुण्यदिनेकन्याधौयुग्म
दिनेउपवीतीसकुटुंबस्त्रियमनिरीक्ष्योद्धायमूत्रपुरीषोत्सर्गे गुणंपूर्ववच्छौचंकृ
त्वापाणीपादौप्रक्षाल्यद्विराचम्यस्नायात्॥ अन्यदावप्यनिषिद्धदिनेपत्नीसु
याद्दष्टाकृतोपवीतउपगत्यस्नानवर्ज्यंसंकल्पंकुर्यात्॥ ततःप्रबोधकालपर्य
तंपुनःपूर्ववाच्यायांगतायथासुखंचपन्नदंप्रभातोद्धानादिस्नायनोनंकर्म
यतिदिनेकुर्यात्॥ ॥रघुनाथेनविदुषभट्टमाधवसूनुना॥कृतानिबंधान्येषां
शुसमूलान्हिकपद्धतिः॥ ॥इतिश्रीमदुपाध्यायमाधवात्मजभट्टरघुनाथवि
रचितआह्निकपद्धतिःसमाप्तः॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥शाके१७१५प्रमादी
नामसंवत्सरेकार्त्तिकवद्यपंचम्यांभृगुवासरेसमाप्तमिदंपुस्तकं॥ ॥छ॥
इदंपुस्तकंजोगळेकरोपनामकहरिभट्टात्मजपरशुरामेणलिखापितं॥ ५॥